# त्रैमासिक परीक्षा 2025-26

**विषय :- संस्कृत**

**कक्षा :- 10वी** **पूर्णांक - 75**

निर्देश : (1) सर्वे प्रश्ना: अनिवार्या: सन्ति ।

(2) प्रश्नानां सम्मुखे अङ्का प्रदत्ता:।

(3) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतभाषायां देयानि ।

प्र.1 उचितं विकल्पं चित्वा लिखत - 1x6=6

(1) फल शब्दस्य प्रथमा विभक्ते: बहुवचनं रूपम् अस्ति-

(अ) फलानि (ब) फलम् (स) फले (द) फलात्

(2) 'रामस्य' पदे विभक्ति: वचनं च अस्ति-

(अ) तृतीया एकवचनम् (ब) द्वितीया एकवचनम् (स) सप्तमी एकवचनम् (द) षष्ठी एकवचनं

(3) 'रमायाम्' पदे विभक्ति: अस्ति-

(अ) तृतीया (ब) सप्तमी (स) षष्ठी (द) चतुर्थी

(4) 'बालक' शब्दस्य पञ्चमी विभक्ते: रूपम् अस्ति-

(अ) बालकात् (ब) बालके (स) बालक: (द) बालकेन

(5) अधोलिखितेषु अव्ययम् अस्ति-

(अ) राम: (ब) मोहन: (स) सर्वत्र: (द) बालक:

(6) 'बालक: सहसा निर्णय: करणीय:' इत्यत्र अव्ययम् अस्ति-

(अ) बालक: (ब) सहसा (स) निर्णय: (द) करणीय:

प्र.2 कोष्ठकात् चित्वा रिक्तस्थानानि पूरयत - 1x6=6

(1) द्वन्द्व समासस्य उदाहरणं..............अस्ति। (जलमग्न:/हरिहरौ)

(2) बहुव्रीहि समासस्य उदाहरणं..............अस्ति। (पीताम्बर:/त्रिभुवनम्)

(3) 'चौरभयम्' पदे समास:................अस्ति। (तत्पुरुष:/कर्मधारय)

(4) 'सूर्योदय:' पदे.............सन्धि: अस्ति। (दीर्घसन्धि:/गुण सन्धि)

(5) 'नम:+ते' सन्धियुक्त पदं..............भवति। (नमस्ते/नमते)

(6) व्यंजनसन्धे: उदाहरणं................अस्ति। (गणेश/वागीश:)

प्र.3 उचितं युग्ममेलनं कुरुत- 1x6=6

| 'अ' | 'ब' |
|---|---|
| (1) भवति | अनु 2 |
| (2) अनुगच्छति | प्र 3 |
| (3) प्रथम पुरुष | भवतु 1 |
| (4) लोटलकार | भू धातो 6 |
| (5) प्राचार्य | लङ्लकार 4 |
| (6) भूतकाले | लिखति 5 |

प्र.4 एकपदेन उत्तरं लिखत- 1x6=6

(1) वृषभः कुत्र पपात् ?

(2) अत्र जीवितं कीदृशं जातम् ?

(3) कुशलवौ कम् उपसृत्य प्रणमतः ?

(4) 'क्रीडितुम' इत्यास्मिन् पदे प्रत्ययः अस्ति ?

(5) 'पठित्वा' इत्यस्मिन् पदे प्रत्ययः अस्ति ?

(6) 'टाप्' इत्य**स्मिन् प्रत्ययस्य उदाहरणम् अस्ति ?**

प्र.5 शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत- 1x6=6

(1) 'आम्रम्' पदस्य पर्यायपदं 'रसालम्' अस्ति।

(2) 'वनम्' पदस्य पर्यायपदं 'कान्तारम्' अस्ति।

(3) 'मूर्खः' पदस्य विलोमपदं 'पण्डितः' नास्ति।

(4) 'सुकरम्' पदस्य विलोमपदं 'दुर्वहम' अस्ति।

(5) 'जननी' तुल्यवत्सला इत्यत्र 'जननी' विशेषणपदम् अस्ति।

(6) 'सुदंरी बालिका' इत्यत्र 'बालिका' विशेषणपदम् नास्ति।

(प्रश्न क्रमांक 6 तः 10 पर्यन्तं प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत-)

प्र.6 कविः कुत्र सञ्चरणं कर्तुम् इच्छति ? (अथवा) 2

अस्माकं पर्यावरणे किं किं दूषितम् अस्ति ?

प्र.7 कुशलवयोः वंशस्य कर्ता कः ? (अथवा) 2

मातुः अधिका कृपा कस्मिन् भवति ?

प्र.8 वसन्तस्य गुणं कः जानाति ? (अथवा) 2

निःसशयं कः कृतान्तः मन्यते ?

प्र.9 केन समः बन्धु नास्ति ? (अथवा) 2

यदि राजा सम्यक् न भवति तदा प्रजा कथं विप्लवेत् ?

प्र.10 रामाय कुशलवयोः कण्ठाश्लेवस्य स्पर्शः कीदृशः आसीत् ? (अथवा) 2

बालभावात् हिमकरः कुत्र विराजते ?

प्र.11 अधोलिखितानि वाक्यानि कः कं प्रति कथयति- (कोऽपि द्वे) 2

| | कः/का | कं/काम् |
|---|---|---|
| (क) भवान् कुतः भयात् पलायितः ? | .................. | .................. |
| (ख) वयस्य ! अपूर्व खलु नामधेयम् | .................. | .................. |
| (ग) जनाम्यहं तस्य नामधेयम् | .................. | .................. |

प्र.12 रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरूत (कोऽपि द्वे) 2

(क) गजः वन्यपशून् तुदन्तं शुण्डेन पोथमित्वा मारयति।

(ख) सुराधिपः ताम् अपृच्छत्।

(ग) बुद्धिमती चपेटया पुत्रौ प्रहतवती।

प्र.13 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् एकं सुभाषितं लिखत 2

प्र.14 वाच्यपरिवर्तनं कुरूत – (कोऽपि द्वे) 2

(क) रामः गृहं गच्छति (कर्मवाच्ये)

(ख) छात्रया पत्रं लिख्यते। (कर्तृवाच्ये)

(ग) गणेशः क्रीडति। (भाववाच्ये)

प्र.15 अधोलिखितेषु अशुद्धकारकवाक्यानां शुद्धिः करणीयाः (कोऽपि द्वे) 2

(क) त्वम् कुत्र गच्छति । (ख) श्री गणेशं नमः । (ग) वृक्षेण पत्राणि पतन्ति।

प्र.16 रिक्तस्थानानि पूरयतत – (कोऽपि चत्वारि) ½x4=2

(अहिभूक्, सदा, मेध्यामेध्यभक्षकः, भृशम्, स्थितप्रज्ञः)

(क) वकः अविचलः............इव तिष्ठति।

(ख) काकः ....................भवति।

(ग) मयूरः.................इति नाम्नाऽपि ज्ञायते।

(घ) ....................समसस्य सदुपयोगः करणीयः।

(ङ) इदानी वायुमण्डलं..............प्रदूषितमस्ति।

प्र.17 प्रदत्तवाक्यैः घटनाक्रमानुसारं लिखत । ½x4=2

(क) व्याघ्रः व्याघ्रमारी इयमिति मत्वा पलायितः।

(ख) बुद्धिमती पुत्रद्वयेन उपेता पितु गृहं प्रति चलिता।

(ग) जम्बुककृत्सोहः व्याघ्रः पुनः काननम् अगच्छत्।

(घ) मार्गे सा एकं व्याघ्रम् अपश्यत्।

प्र.18 अधोलिखित गद्यांशं पठित्वा प्रश्नानां उत्तराणि लिखत- 3

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसतिस्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रम् आगच्छन्तं दृष्ट्वा घाष्ट्र्यात् पुत्रौ चपेटया प्रहत्य जगाद–'कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः ?

(1) देउलख्यो ग्रामे कः वसति स्म ? (2) तस्य भार्या का आसीत् ? (3) सा कं ददर्श ? **अथवा**

इति श्रुत्वा व्याघ्रमारी काचिदियामिति मत्वा व्याघ्रो भयाकुलचित्तो नष्टः। निजबुद्धया विमुक्ता सा भयाद् व्याघ्रस्य भामिनी। अन्योऽपि बुद्धिमाल्लोके मुच्यते महतो भयात् ।। भयाकुलं व्याघ्रं दृष्ट्वा कश्चित् धूर्तः भृगालः हसन्नाह– ''भवान् कुतः भयात् पलायितः ?''

(1) व्याघ्रो कथं नष्टः? (2) सा भामिनी व्याघ्रस्य भयाद् कथं विमुक्ता ?

(3) भयाकुलं व्याघ्रं दृष्ट्वा कः हसन्नाह ?

प्र.19 अधोलिखितम् पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत – 3

गुणी गुणं वेत्ति न वेत्ति निगुणो, बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः, करी च सिंहस्य बलं न मूषकः।।

(1) कः गुणं वेत्ति ? (2) बलं कः ने वेत्ति ? (3) सिंहस्य बलं कः वेत्ति कः न वेत्ति ? **(अथवा)**

कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम् । वाष्पयानमाला संधावति वितरन्ती ध्वानम्।।
यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम् । शुचि।।

(1) शतशकटीयानं किं कुञ्चति ? (2) का संधावति ? (3) वाष्पयानमाला कथं संधावति ?

प्र.20 अधोलिखितम् नाट्यांश पठित्वा प्रश्नानाम् उत्तराणि लिखत् - 3

रामः - कथमस्मत्समानाभिजनौ संवृत्तौ ?

विदूषकः - किं द्वयोरप्येकमेव प्रतिवचनम् ?

लवः - भ्रातरावावां सोदर्यौ ।

रामः - समरूपः शरीरसन्निवेशः। वयसस्तु न किञ्चिदन्तरम् ।

लवः - आवां यमलो।

(1) को आवां सोदर्यौ ?

(2) कथं शरीरसन्निवेशः ?

(3) लवः आवां कौ ?

(अथवा)

वनस्य दृश्यं समीपे एवैका नदी वहति । एकः सिंहः सुखेन विश्राम्यते तदैव एकः वानरः आगत्य तस्य पुच्छं धुनाति। क्रुद्धः सिंहः तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारूढः । तदैव अन्यस्मात् वृक्षात् अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षस्योपरि आरोहति। एवमेव वानराः वारं वारं सिंह तुदन्ति।

(1) कः सुखेन विश्राम्यते ?

(2) कः आगत्य सिंहस्य पुच्छं धुनाति ?

(3) अपरः वानरः किं करोति ?

प्र.21 अधोलिखितम् अपठित गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत् - 4

संसारे अनेकषां दुःखानां मूलकारणम् अज्ञानम्। अज्ञानात् एव समाजे नानाविकाराणां जन्म भवति। हिंसाभ्रष्टाचारादयः ये उपद्रवाः अस्मान् पीडयन्ति, तेषां मूले अशिक्षा एव वर्तते । वयं शिक्षायाः प्रकाशेन अज्ञानस्य अन्धकारं हर्तुम् सज्जाः भवेम।

(1) अस्य गद्यांशस्य शीषकं लिखत।

(2) दुःखानां मूलकारणं किम्।

(3) समाजे अनेके विकाराः कथं जायन्ते ?

(4) के उपद्रवाः अस्मान् पीडयन्ति ?

प्र.22 स्वप्राचार्य कृते दिनद्वयस्य अवकाशार्थं प्रार्थनापत्रं लिखत् । 4

अथवा

अग्रजस्य विवाहे आमंत्रयितुं स्व-मित्रं प्रति पत्रं लिखत ।

प्र.23 अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायं निबंधं लिखत् 4

1) संस्कृत भाषायः महत्वम्

2) पर्यावरणम्

3) अस्माकं भारत देशः

4) महाकविः कालिदासः